दिनाङ्कः - 12.12.2024 सायम् - 06:20

इयम् आकाशवाणी

सम्प्रति वार्ताः श्रूयन्ताम्

<u>मुख्यवार्ताः</u>

- सर्वोच्चन्यायालयेन अद्य आदेशः प्रदत्तः यत् देशे पूजास्थलाधिनियमस्य अन्तर्गतं कानिचन् नूतनानि प्रकरणानि पञ्जीकृतानि न भविष्यन्ति।
- छत्तीसगढे अद्य नारायणपुरमण्डले सुरक्षाबलैः सह जाते संघर्षे न्यूनातिन्यूनं सप्त माओवादिनः मारिताः ।
- पुर्तगालस्य विदेशमन्त्री पाउलो रङ्गेलः अद्य भारतस्य चतुर्दिवसीय आधिकारिकयात्रायाः कृते नवदिल्लिं प्रति आगतवान्।
- बैडमिण्टन् क्रीडायां अद्य चीनदेशस्य हाङ्ग चाउ-नगरे वर्डटूर इत्यस्य -अन्तिम-क्रीडायां ट्रीसा – जॉली - गायत्रीगोपीचंदयोः भारतीयमहिला-युगलदलं समूहस्य तृतीये चरणे प्रविष्टम्।

--------------------------------------

<u>सर्वोचचन्यायालयः- पूजाअधिनियमः</u>

सर्वोच्चन्यायालयेन अद्य आदेशः प्रदत्तः यत् देशे पूजास्थलाधिनियमस्य अन्तर्गतं कानिचन् नूतनानि प्रकरणानि पञ्जीकृतानि न भविष्यन्ति। न्यायालयेन आदेशः दत्तः यत् दीर्घमानप्रकरणेषु उच्चन्यायालयस्य अग्रिम- आदेशं यावत् अन्तिमः प्रभावी वा आदेशः न पारितः भविष्यति। मुख्य न्यायाधीशस्य संजीवखन्ना इत्यस्य नेतृत्वे विशेषपीठेन केन्द्रसर्वकारेण एकनवत्यधिक-ऊनविंशति-शततमे वर्षे कृतस्य अधिनियमस्य वैधतां समाह्ववानयुतासु प्रदात्तृयाचिकासु उत्तरं चतुर्सप्ताहस्य आभ्यन्तरे एव दातुं कथितम्, यस्मिन् पूजास्थानं पुनः प्राप्तुं वा परिवर्तनं याचयितुम् वा नवीन प्रकरणम् पञ्जिकर्तुं निषिद्धम् अस्ति।

--------------------------------------

<u>राज्यसभा स्थगनम्</u>

अडानीसमूहस्य विरुद्धं कथितस्य धनग्रहणस्य आरोपं तथा च काङ्ग्रेसनेतृणां अमेरिकादेशस्य जार्ज सोरोस् फाउण्डेशन इत्यस्य च संयुते : विषये सत्तापक्ष-विपक्षयोः मध्ये कोलाहल कारणात् राज्यसभा आदिनं यावत स्थगिता जाता। प्रथमस्य स्थगनस्य अनन्तरं यदा सदनस्य उपवेशनं अपराह्ने द्विवादने आरब्धम् तदा सदने पक्षविपक्षयोः सदस्यानां मध्ये पुनः मौखिक द्वन्द्वं समारब्धम् । अध्यक्षेण जगदीप-धनखडेन कोलाहालस्य मध्ये कार्यजातं-सञ्चालनस्य प्रयासोपि विहित:। सांसदः एचडी देवेगौडा अध्यक्षस्य विरुद्धं अविश्वासप्रस्तावे विपक्षस्य आलोचनां कृतवान्। सः अवदत्, यत् विपक्षेण सदनस्य कार्याचरणे सहयोगं करणीयम्। विपक्षनेता मल्लिकार्जुन खर्गे इत्येष : श्रीधनखड़स्य उपरि पक्षपातस्य आरोपं कृतवान्। सः आरोपितवान् यत् शासनारूढपक्ष: काङ्ग्रेसदलस्य विरुद्धं तथ्यहीनानि आरोपाणि करोति, अध्यक्षः च तान् प्रोत्साहयति। खर्गे इत्यस्य भाषणस्य समये उभयो: पक्षयोः सदस्याः स्वस्य विरोधप्रदर्शनं निरन्तरं कृतवन्त:। अस्य कोलाहलस्य मध्ये अध्यक्षः सदनं आदिन पर्यन्तम् स्थगितवान्।

---------------------------------------

<u>छत्तीसगढ-माओवादी</u>

छत्तीसगढे अद्य नारायणपुरमण्डले सुरक्षाबलैः सह जाते संघर्षे न्यूनातिन्यूनं सप्त माओवादिनः मारिता: । केन्द्रीयआरक्षीबलस्य विशेषकार्यदलस्य, मंडलीय बलस्य च संयुक्तदलेन क्षेत्रे माओवादिनः उपस्थितेः विषये गुप्तसूचनाः सम्प्राप्य मण्डलस्य अबूझमाड़ क्षेत्रे अन्वेषण कार्यं आरब्धम्। अन्वेषण - अभियानावधौ भुशुण्डीकया प्रहार: जात: यस्मिन् सप्त माओवादिनः मारिताः। सुरक्षाबलेन हतमाओवादिनां शवाः प्राप्ताः। अंतिम सूचना प्राप्तिं यावत् क्षेत्रे दलयोः मध्ये द्वन्द्वं प्रचलति स्म ।

---------------------------------------

<u>पुर्तगालस्य विदेशमन्त्री</u>

पुर्तगालस्य विदेशमन्त्री पाउलो रङ्गेलः अद्य भारतस्य चतुर्दिवसीय आधिकारिकयात्रायाः कृते नवदिल्लिं प्रति आगतवान्। पुर्तगालस्य विदेशमन्त्रिणः भारतस्य प्रथमा आधिकारिकयात्रा अस्ति । स्वस्य भ्रमणकाले पुर्तगालस्य विदेशमन्त्री श्वः नव दिल्ल्यां विदेशमन्त्रिणा डॉ. एस. जयशंकरेण सह उपवेशनं करिष्यति। सः शनिवासरे कार्यक्रमेषु भागं ग्रहीतुं गोवानगरम् अपि गमिष्यति।

---

<u>लोकसभा मार्ग सुरक्षा</u>

दुर्घटनापीडितानां राशिरहितचिकित्सा योजना शीघ्रमेव सम्पूर्णे देशे आरप्स्यते। केन्द्रीयपरिवहनराजमार्गमन्त्री नितिनगडकरी अद्य प्रश्नकालसमये लोकसभायां उत्तरे एतत् उक्तम्। मन्त्री उक्तवान् यत्, षड राज्येषु प्रचलिता योजना उत्तरप्रदेशे, अनन्तरं देशस्य शेषभागे च प्रारभ्यते। योजनायाः कारणात् मार्गदुर्घटनायां पीडिताः चिकित्सालयेषु एक दशमलव पञ्च लक्षरूप्यकाणि यावत् राशिरहितचिकित्सां प्राप्तुं शक्नुवन्ति।

श्रीगडकरी अवदत् यत्, राशि रहितचिकित्सायोजनया षट् राज्येषु एकविंशतिशतं यावत् जनानां प्राणाः रक्षिताः भविष्यंति यत्र इदानीं योजना कार्यान्विता भवति। राजमार्गेषु वर्धमान-दुर्घटनानां विषये चिन्ताम् प्रकटयन् मन्त्री सदस्यैः अनुरोधं कृतवान् यत् प्रत्येकस्मिन् मण्डले दुर्घटनानिवारणसमित्याः स्थापनां कुर्वन्तु येन एतादृशानां मार्गदुर्घटनानां कारणानि द्रष्टुं शक्यते इति।

---

<u>केरल रेड अलर्टः</u>

केरलराज्ये भारतीयऋतुविज्ञानविभागेन राज्यस्य त्रयाणाम् मण्डलानां कृते रक्तवार्णिकि सञ्चेतना प्रसारिता, अपि च प्रचण्डवृष्टेः सम्भावना प्रकटितास्ति। अनेन विभागेन प्रसारित-ऋतुवार्तानुसारि पथानामथिट्टा, एर्नाकुलम्, इडुक्की मण्डलानां च कृते रक्त वार्णिकी सञ्चेतना प्रसारितास्ति । अन्येषां पञ्च मंडलानां - तिरुवनन्तपुरम्, कोल्लम्, अलप्पुझा, कोट्टायम्, त्रिशूर् इत्येतेषां च कृते नारङ्ग वार्णिकी सञ्चेतानापि प्रसारितास्ति।

---

<u>दिव्याकला</u>

अद्य नव दिल्ल्यां इण्डिया गेट् इत्यत्र द्वाविंशति तमस्य दिव्यकलामेलकस्य आरम्भः जात:। सामाजिकन्यायसशक्तिकरणमन्त्रालयस्य अन्तर्गतं दिव्याङ्ग-जनानाम् सशक्तिकरणविभागः

**भारतस्य दिव्याङ्ग-कलाकाराणां प्रतिभां, सृजनशीलतां, उद्यमशीलतां च प्रदर्शयितुं एकादश दिवसीयस्य आयोजनस्य आयोजनं कुर्वन् अस्ति। शताधिकाः दिव्याङ्ग उद्यमिनः शिल्पिनः च स्वस्य उत्पादानाम् कौशलस्य च प्रदर्शनं करिष्यन्ति। अस्य मासस्य द्वाविंशतिः दिनाङ्कपर्यन्तं प्रातः एकादश वादनात् रात्रौ नव वादनपर्यन्तं मेलकस्य आयोजनं भविष्यति।**

**------------------------------------------**

**प्रसारभारती-हॉकी इण्डिया**

**प्रसारभारती अद्य नवदिल्ल्यां हॉकी इण्डिया इत्यनेन सह एकं सन्धिपत्रं हस्ताक्षरितवती, आगामिन: हॉकी इण्डिया लीग् इत्यस्य सजवप्रसारणं प्रदातुं इयं सन्धि: हस्ताक्षरिता। यया दूरदर्शनं चतुर्विंशत्यधिक द्विसहस्र-पञ्चविंशत्यधिक द्विसहस्र तम वर्षयोः हॉकी इण्डिया लीग् इत्यस्य आधिकारिकप्रसारकम् भविष्यति।**

**अस्मिन् अवसरे हॉकी इण्डिया लीग (एच.आई.एल.) इत्यस्य शासकीय समित्याः सदस्य भोलानाथसिंहः प्रसारभारत्याः अध्यक्षः नवनीत सहगलः च ज्ञापनपत्रस्य आदानप्रदानं कृतवन्तौ। कार्यक्रमेस्मिन् प्रसार भारत्याः अन्येपि गणमान्याः उपस्थिताः आसन्।**

**------------------------------------------**

**बैडमिण्टन् :**

**बैडमिण्टन् क्रीडायां अद्य चीनदेशस्य हाङ्ग चाउ-नगरे वर्ल्डटूर इत्यस्य -अन्तिम-क्रीडायां ट्रीसा-जॉली-गायत्रीगोपीचंदयोः भारतीयमहिलायुगलदलं समूहस्य तृतीये चरणे प्रविष्टम्।**

**।।इति वार्ता:।।**